# सुवर्णपुरीषम्

एकसमिन् वने कश्चन महावृक्षः आसीत् । तत्र कश्चन पक्षी वासं करोति स्म । तस्य पुरीषम् सुवर्णमयम् आसीत् ।

एकदा कश्चन व्याधः तत् अरण्यं आगतवान् । तदा पक्षिणा तस्य पुरतः एव पूरीषोत्सर्जनं कृतम् । पूरीषं सुवर्णं इति दृष्ट्वन्तः व्याधस्य आश्चर्यं जातम् । सः चिन्तितवान् – 'जन्मनि एतावत्पर्यन्तम् अहम् एतादृशं विचित्रपक्षिणं न दृष्टवान् । अहो एतस्य पुरीषे सुवर्णम् उत्पद्यते' इति ।

सः जालं प्रसार्य तं पक्षिणं गृहीतवान् । पञ्जरे स्थापितवान् च । पुनः एतादृशः विचित्रः पक्षी महाराजस्य समीपे एव भवेत् इति चिन्तयन् महाराजस्य एव एतं पक्षिणम् उपायनीकरोमि इति चिन्तयित्वा सः नगरं गतवान् । महाराजं दृष्ट्वा उक्तवान् च – 'महाराज, एषः कश्चन विचित्रः पक्षी । एतस्य पुरीषम् सुवर्णम् भवति' इति ।

महाराजः अतीव सन्तुष्टः । सः सेवकान् उक्तवान् – 'भोः सावकाः, एतं पक्षिणं जागरूकतया रक्षन्तु । व्याधाय पारितोषिकं यच्छन्तु' इति ।

तदा मन्त्री महाराजम् उक्तवान् – 'महाराज एषः व्याधः असत्यं वदति । कदाचित् वा पक्षिपुरीषे सुवर्णम् उत्पद्यते किम् एतत् असत्यमेव । व्याधस्य वचने विश्वासः न करणीयः । एतं पक्षिणं पञ्जरतः विमोचयतु' इति ।

सेवकाः मन्त्रिवचनानुसारं पञ्जरद्वारम् उद्घाटितवन्तः । पक्षी पञ्जरतः उड्डीय राजभवनस्य उन्नते द्वारे उपविष्टवान् । तत्र सः पुरीषोत्सर्जनं कृतवान् । तत् पुरीषं सुवर्णमयम् आसीत् । राजादयः आश्चर्येण तत् दृष्टवन्तः

तदा पक्षी चिन्तयति – 'मूर्खः अहं व्याधस्य जाले पतितः । मूर्खव्याधः मां महाराजस्य दत्तवान् । सः मूर्खः महाराजः मूर्खस्य मन्त्रिणः वचनानुसारं मां बन्धविमुक्तं कृतवान् । एवं समग्रं जगत् एव मूर्खमण्डलम्' इति ।

* * *